National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2026;** 1(64): 19-22
© 2026 NJHSR
www.sanskritarticle.com

**सिद्धान्तषडङ्गी**
शोधच्छात्रः, संस्कृतविभागः,
रेभेन्साविश्वविद्यालयः,
कटकम्

**Correspondence:**
**सिद्धान्तषडङ्गी**
शोधच्छात्रः, संस्कृतविभागः,
रेभेन्साविश्वविद्यालयः,
कटकम्

# वाजसनेयिप्रातिशाख्यानुसारेणोच्चारणस्थानानि

**सिद्धान्तषडङ्गी**

**प्रस्तावना**

विद् धोतोरुत्तरं धञ् प्रत्ययेन वेदशब्दस्य निष्पत्तिर्भवति, यथार्थज्ञानम्। संस्कृतभाषायाम् अर्थभेदेन विद् धातोः प्रधानतया अर्थचतुष्टयं प्राप्यते। तद्यथा सत्त्वार्थे ज्ञानार्थे विचारार्थे लाभार्थे च। केचन विद्धातोः अर्थचतुष्टयं स्वीकृत्य कथयन्ति यत्, येन अनाद्यपौरुषेयनित्यपवित्रशब्दसमूहेन ज्ञानाभिन्नस्य सत्ताभिन्नस्य च परब्रह्मस्वरुपसुखस्य विचारपूर्वकप्राप्तिः सम्भवति, तस्य मन्त्रब्राह्मनात्मकस्य इष्टप्रास्यनिष्टपरिहारयोः अलौकिकोपायज्ञापकशब्दसमूहो ग्रन्थो वा वेद इत्युच्यते। अतो वेदशब्दस्य व्युत्पत्तिगतार्थः भवति वेदनं ज्ञानं वा। यतो हि ज्ञानम् अनन्तम् अतो वेदोऽपि अनन्तः। ज्ञानमिदं पार्थिवज्ञानात् इन्दियज्ञानात् सम्पूर्णं स्वतन्त्रमतीन्द्रियं परं ज्ञानम्। भाष्यकारेण सायणेन उक्तम्- "इष्टप्रास्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति सः वेदः।"[1] स्मृतिकारमनुना यथार्थेनोक्तम् यत् - "वेदोऽखिलो धर्ममूलम्"[2]।

अतिप्राचीनकालादेव भारतीयानां समीपे वेदो नित्यः, अभ्रान्तः, स्वतःसिद्धः, सनातनः अपौरुषेयः, ईश्वरस्य निःश्वसितरूपः, तत्सह श्रेष्ठधर्मग्रन्थरूपेण परमश्रद्धया स्वीकृतः। वेद अलौकिक एक अखण्डज्ञानराशिः, यत्र मानवानां धर्म-अर्थ-काम-मोक्षादिचतुर्वर्गस्य फलप्राप्तिर्भवति। अधुनापि वेदपाठस्य तन्मूल्याङ्कनस्य च विषये महती चर्चा प्रचल्यमाना। वस्तुतो धर्म-कर्म-कर्मफल-यज्ञ-यज्ञफल-स्वर्ग-परलोकत्व-अदृष्टादीनां ज्ञानानां ब्रह्मज्ञानानां च आकरस्वरूपो भवत्ययं वेदः। श्रुतिः, आगमः, छन्दस् इत्यादयः वेदस्य पर्यायवाचिनः शब्दाः। यदा वैदिकयुगे ऋषयः परमब्रह्मणः चिन्तने तपः कुर्वन्तः आसन् तदा एते वेदमन्त्राः तेषां मनसि उद्भासिताः। शिष्याः आचार्यमुखात् वेदमन्त्रान् श्रुत्वैव स्वमेधावलेन अवधानेन च स्वबुद्धौ रक्षयन्ति स्म। ते एव शिष्याः परम् आचार्याः भूत्वा तदीयशिष्येभ्यः श्रवणमाध्यमेन वेदविद्यां प्रयच्छन्ति स्म। एवं क्रमेण वैदिकसम्प्रदाये आचार्य-शिष्य-प्रशिष्य-प्रशिष्यशिष्यपरम्परानुसारेण परमज्ञानस्य आकरस्य वेदस्य श्रुतौ रक्षणं भवति स्म। एतत्कारणादेव वेदः श्रुतिशब्देन अभिधीयते। परन्तु परवर्तिनि काले मेधाशक्तेः ह्रासकारणात् वेदार्थज्ञानस्य सुनिश्चितरूपेण रक्षणाय वेदाङ्गसमूहस्य उत्पत्तिर्जाता। वेदस्य शब्दबोधार्थम् अर्थबोधार्थञ्च वेदपाठस्य रीर्ति ज्ञातुं क्रियया मन्त्रस्य सम्पर्कनिर्देशादिविषयेषु वेदाङ्गानां ज्ञानमपरिहार्यमस्ति। अत्र प्रश्नः भवति वेदाङ्ग किम्? अङ्गिनः सहायकः भवति अङ्गः। 'वेदः' भवति 'अङ्गी', 'वेदाङ्ग' तस्य उपकारकम्। वेदाङ्गमिति शब्दः संस्कृते क्लीवलिङ्गे विद्यते अतः वेदाङ्गम्। षण्णां वेदाङ्गानां साकल्येन वेदाङ्गानि इति नाम। एतेषां षड्वेदाङ्गानां साकल्येन बहुवचने च वेदाङ्गानि इति प्रसिद्धः व्यवहारः। कुत्रचित् 'वेदाङ्गानि' इति पदस्य स्थाने षडङ्गानि इति पदस्य व्यवहारो दृश्यते। 'वेदाङ्गानि' इति पदस्य अर्थो भवति वेदस्य अङ्गानि अर्थात् वेदस्य अङ्गसमूहः। अङ्गानि इति पदस्य व्युत्पत्तिः भवति 'अङ्गन्त्ये ज्ञायन्ते अमीभिरिति अङ्गानि' अथवा 'अङ्गन्त्ये ज्ञायन्ते एभिरिति अङ्गानि' अर्थात् वेदाङ्गैः वेदशास्त्रस्य स्वरूपं ज्ञायते। अत अङ्गशब्दस्य अर्थो भवति उपकारकम्। अङ्ग सर्वदा अङ्गीनः उपकरोति।

अतः वेदस्य उपकारकरूपेण सहायकरूपेण वा विद्यमानस्य शास्त्रस्य नाम भवति वेदाङ्गम्। अथर्ववेदीयमुण्डकोपनिषदि उक्तमस्ति- "तत्रापरा ऋग्वेदो सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते"। अर्थात् मुण्डकोपनिषदि द्वयोः परापरविद्ययोः उल्लेखः विद्यते। तन्मध्ये अपराविद्या भवति वेदचतुष्टयं षड्वेदाङ्गानि चेति। वेदाङ्गानि भवन्ति- शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्योतिषञ्चेति। उपनिषद्भवति पराविद्या।

प्रधानतया षड्वेदाङ्गानि अङ्गीरूपवेदस्य त्रिधा उपकारं साधयन्ति। यथा स्वाध्यायार्थं शिक्षा छन्दश्च। अर्थज्ञानस्य कृते व्याकरणं निरुक्तञ्च। वैदिककर्मानुष्ठानाय कल्पः ज्योतिषञ्चेति। आंग्लभाषायाम् एतेषां वेदाङ्गानां नामकरणं कृतं वर्तते यत्- शिक्षामुच्यते 'Phonetics', छन्दमुच्यते 'Prosody', व्याकरणमुच्यते 'Grammar', निरुक्तमुच्यते 'Science of etymology', ज्योतिषमुच्यते 'Astronomy', कल्पमुच्यते 'The Science of Ritualistic literature'। पाणिनीयशिक्षाग्रन्थे अपि प्रसिद्धश्लोक-द्वयेन वेदस्य परमपुरुषत्वमाकलय्य षड्वेदाङ्गानि तस्य परमपुरुषस्य वेदस्य अङ्गानि इति वर्णितमस्ति-"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।। शिक्षा प्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"।।राजशेखरः तस्य काव्यमीमांसायां वेदाङ्गविषये लिखितवान्-"तत्र वर्णानां स्थानकरणप्रयत्नादिभिः निष्पत्तिनिर्णयिनी शिक्षा आपिशलीयादिका। नानाशाखाधीतानां मन्त्राणां विनियोजकं सूत्रं कल्पः। सा च यजुर्विद्या। शब्दानामणवाख्यानं व्याकरणम्। निर्वचनं निरुक्तम्। छन्दसां प्रतिपादयित्री छन्दोविचितिः। ग्रहगणितं ज्योतिषम्ऽ"।

एतच्छडङ्ग विहाय अपि सः सप्तमवेदाङ्गरूपेण अलंकारं चितवान्। वेदभाष्यकारः सायणाचार्यः ऋग्वेदभाष्यभूमिकायां 'वेदस्य षडङ्गानां समुद्देशः' इत्युक्त्वा वेदाङ्गानां समुद्देशम् आलोचितवान्। षट्प्रकारेषु वेदाङ्गेषु शिक्षा अन्यतमा गुरुत्वपूर्णा च। शिक्षाग्रन्थानां पर्यालोचनया दृश्यते यत् प्रायः ते सर्वे अपि स्वरविचारे प्रवृत्ताः। शिक्षा इति शब्दस्य अर्थो भवति 'निर्देशः'। वर्णः स्वरः प्रभृतीनाम् उच्चारणपद्धतिविषये येषु ग्रन्थेषु उपदेशाः निर्देशाः वा विधास्यन्ते ते भवन्ति शिक्षाग्रन्थाः। ऋग्वेदभाष्योपक्रमणिकाग्रन्थे शिक्षा इति नामकस्य वेदाङ्गस्य आलोचनाप्रसङ्गे प्रसिद्धः वेदभाष्यकारः सायनचार्यः उक्तवान्- "वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा"।

शिक्षायाः उल्लेखः कृष्णयजुर्वेदस्य तैत्तिरीयोपनिषदः शिक्षाबल्ल्यां द्वितीये अनुवाके उक्तमस्ति- "शीक्षां व्याख्यास्यामः। वर्णः, स्वरः, मात्रा, बलं, साम, संतान इत्युक्तः शीक्षाध्यायः 7"। वस्तुतः अकारादयः वर्णाः, उदात्तादयः स्वराः, ह्रस्वादयः मात्रा, बलं भवति ताल्वाद्युच्चारणस्थानानि, सामः अथवा साम्यम् अर्थात् दोषहीनमाधुर्यगुणयुक्तमुच्चारणं, सन्तानः वा संहिता वा सन्धिः इति एतान् उच्चारणविषयानाश्रित्यैव शिक्षाशास्त्रं विराजते। अपरत्र शिक्षाशास्त्रेण सह सम्बन्धयुक्तो ग्रन्थो भवति प्रातिशाख्यम्। वेदस्य विभिन्नशाखाध्यायिनः स्वेषां गणस्य कृते संहितापाठादारभ्य पदपाठं, स्वरं, मात्राञ्च आधारीकृत्य विशिष्टान् नियमान् संगृहीतवन्तः। प्रत्येकस्यां शाखायां विद्यमानस्य एवम्विधग्रन्थस्य नाम भवति प्रातिशाख्यम्। वैदिकधर्मे गोष्ठीतन्त्रस्य आधिक्यं दृश्यते। एकैकवेदस्य नैके शाखाः दृश्यन्ते। प्रत्येकस्याः शाखायाः स्व स्व वैशिष्ट्यं स्वातन्त्र्यञ्च वर्तते। अतः प्रत्येकस्याः शाखायाः आत्मनिर्भरत्वत्वात् स्व स्व शाखायाः कृते ग्रन्थाः विरचिताः वर्तन्ते। परन्तु आश्चर्यस्य विषयस्तावत्, वैदिकधर्मस्य विभागबहुत्वेन कदापि विभेदसृष्टिः न जाता। यथा एका स्फीता नदी प्राकृतिकप्रयोजनाय बहुनां शाखानां विस्तारं करोति, यथा वा वटवृक्षः तस्य शाखाप्रशाखाविस्तारेण स्वस्य दृढतां सम्पादयति, तथैव बहुविस्तीर्णवैदिकधर्मः अखण्डरूपेण एकधर्मरूपेण च अद्यापि सुप्रतिष्ठितः विराजते। अस्मिन्नेव प्रसङ्गे प्रातिशाख्यग्रन्थानां नामग्रहणं करणीयं भवति। प्रातिशाख्यग्रन्थाः प्रायः शिक्षाग्रन्था-नुरूपाः। प्रातिशाख्यस्य विषयाः शिक्षायाःविषयवस्तुनः अपेक्षा व्यापकतराः। प्रातिशाख्ये यथा वर्णः, स्वरो इत्यादयः नियमाः सन्ति तथैव छन्दसो व्याकरणस्य अन्यान्यविषयाणां सन्निवेश अत्रैव वर्तते। अर्थात् एकवाक्येन वक्तुं शक्यते यत् शिक्षायाः, व्याकरणस्य, छन्दसः च समाहारः भवति प्रातिशाख्यग्रन्थः। एवं मनसि भाति यत् वैदिकयुगस्य केचन शिक्षाग्रन्थाः भवन्ति चेदपि प्रातिशाख्यस्य विषयस्य व्यापकत्वात् अर्थात् शिक्षायाः विषयस्य अत्रैव अन्तर्गतत्वात् प्रातिशाख्यग्रन्था अधिकजनप्रियाः। अपि च कालक्रमेण अपरिहार्याः जाताः। प्रातिशाख्यं भवति कस्यापि वेदशाखायाः भाषातात्त्विकनियमानां संकलनम्। परन्तु शिक्षाग्रन्थः प्रातिशाख्यग्रन्थश्च उभौ भिन्नौ ग्रन्थौ चेदपि विषयगतदृष्ट्या उभाभ्यामपि बहुत्र विषयेषु सादृश्यता भजते। यथा, शिक्षाग्रन्थेषु प्रातिशाख्यग्रन्थेषु च स्वरः विशिष्टं स्थानं अधिकृत्य वर्तते।

प्राचीनभाषावत् वैदिकभाषाया अपि एकं प्रधानं वैशिष्ट्यमासीत् तस्य स्वरः। लौकिकसंस्कृते स्वरस्य तथा सम्यकरूपेण व्यवहारो न दृश्यते। परन्तु वैदिकसंस्कृते स्वरस्य गुरुत्वं महत् वर्तते। दीर्घकालादेव गुरुशिष्यपरम्पराक्रमेण वैदिकशास्त्रं केवलम् उच्चारणेनैव विधृतम् आसीत्। फलतः वर्णसमूहस्य, पदसमूहस्य तथा मन्त्रस्य विशुद्धतया उच्चारणम् अत्यन्तं गुरुत्वपूर्णस्थलमाश्रित्य तिष्ठति। उच्चारणस्य विशुद्धतां रक्षयितुं प्राचीनशास्त्रकारैः यस्य प्रकरणस्य तथा कौशलस्य उद्भावनं कृतमासीत् किञ्च यस्य फलश्रुतौ वेदमन्त्राः प्रायो

अविकृतरूपेण दीर्घकालं यावत् विशुद्धरूपेण च गृहीताः आसन्, तन्मध्ये अन्यतमः भवति अयं स्वरः। अतएव यथायथरूपेण वेदपाठार्थ स्वरज्ञानमपेक्षितमस्ति, नो चेत् मन्त्रार्थस्य परिवर्तनं भवितुमर्हति। उदाहरणरूपेण वक्तुं शक्यते यत् 'स्वाहेन्द्रशत्रुर्वर्धस्व'। यज्ञकाले एतादृशस्य मन्त्रस्य अहमभवत् येन पूर्णाहुतिर्दीयते। इन्द्रस्य शत्रुःअर्थात् शातयिता घातकः भवेदिति एतादृशपुत्रस्य जन्म भवतु इति एतत्कारणात् मन्त्रपाठः जातः। परन्तु 'इन्द्रशत्रुः' इति अस्मिन् पदे अन्तोदात्तस्थले आद्युदात्तस्य उच्चारितत्वात् विवक्षितार्थस्य प्रतीतिः नाभवत्। अन्तोदात्तस्वरे उच्चारितः भवति चेत् षष्ठीतत्पुरुषसमासस्य अर्थः भवति 'इन्द्रस्य शत्रुः' इति। अतः 'समासस्य' इति सूत्रानुसारेण तत्पुरुषसमासस्य अन्त्यस्वरो उदात्तः भवति। पुनः आद्युदात्तस्वरेण उच्चारितः भवति चेत् बहुव्रीहिसमासस्य 'इन्द्रः शत्रुः यस्य सः' इति एतादृशो अर्थः प्राप्यते। अतः 'इन्द्' इति धातोः परं 'रन्' इति प्रत्यययोगेन इन्द्रशब्दस्य निष्पत्तिः भवति। अतएव आचार्यः पाणिनिः अष्टाध्याय्यां 'ञ्नित्यादिर्नित्यम्' इति सूत्रानुसारेण इन्द्र इति शब्दो आद्युदात्तः। अपि च 'बहुव्रीहौ प्रकृत्या पूर्वपदम् ' 10 सूत्रानुसारेण बहुव्रीहिसमासस्य पूर्वपदस्य प्रकृतिस्वरः भवति अर्थात् समासस्य पूर्व पूर्वपदस्य यः स्वरो उदात्तः स्वरितो वा आसीत्, समासात् परमपि स एव स्वरः तिष्ठति। अतएव इन्द्रस्य घातकपुत्रस्य जन्म भवतु इति ऐच्छन् आभिचारिकयज्ञस्य आयोजनं कृतमासीत्। परन्तु आद्युदात्तस्वरोच्चारणकारणात् 'इन्द्रः घातकः यस्य' तादृशस्य पुत्रस्य जन्म अभवत्। अतः वृत्रासुरस्य जन्म अभवत् परन्तु स्वरदोषात् इन्द्रेण वृत्रस्य वधः जातः।

स्वरस्य सामान्यपरिचयः इत्युक्ते उदात्तानुदात्तस्वरितादीनां विविधस्वराणां संक्षिप्तपरिचयः, ग्रन्थानुसारेण नानाविधप्रकाराः अपि च स्थान विशेषेण प्रयुक्तस्य विभिन्नार्थयुक्तस्य स्वरशब्दस्य कथं प्रयोगः विहितास्ति इत्यादीन् विषयान् प्रकाशयितुमेव प्रथमोऽध्याये विशदालोचना संगृहीता अस्ति। संकेतेन चिह्नन वा यथा कस्यचित् विषयस्य सहजतया संक्षेपेण च ज्ञानं जायते तथैव वेदस्य संहिताब्राह्मणारण्यकादिभेदेन वैदिकस्वराणां चिह्नम् अवगन्तुमेव द्वितीयाध्याये वैदिकस्वराणां चिह्नमित्याख्यातस्य द्वितीयाध्यायस्य अवतरणं साधितमस्ति ।विभिन्नवेदेन सह सम्पर्कयुक्तः एको एकाधिको वा शिक्षाग्रन्थः विद्यते परन्तु प्रत्येकः अपि शिक्षाग्रन्थ तस्य स्ववेदानुसारेण आलेचनायां यथोपयुक्तः। एतेषु विविधशिक्षा-ग्रन्थेषु स्वरविषयकं वर्णनं कथमस्ति इति विज्ञापयितुं शिक्षाग्रन्थानुसारेण स्वरालोचना इत्याख्यातः तृतीयोऽध्यायः। परन्तु अध्याये अस्मिन् सर्वेषां शिक्षाग्रन्थानां वर्णनं कर्तुमहम् अशक्तः। कार्यस्य अस्य विस्तारं तथा समयस्य परिधिं मनसि निधाय शिक्षाग्रन्थेषु केवलं पाणिनीयशिक्षानुसारेण, याज्ञवल्क्यशिक्षानु-सारेण, व्यासशिक्षानुसारेण, नादीयशिक्षानुसारेण किञ्च माण्डुकी-शिक्षानुसारेण वैदिकस्वराणाम् आलोचना समुपस्थापिता वर्तते। प्रातिशाख्यग्रन्थानुसारेण स्वरालोचना इत्याख्याते चतुर्थोऽध्याये समेषां प्रातिशाख्यानाम् आलेचनाम् अकृत्वा केवलम् ऋग्वेद-प्रातिशाख्ये तैत्तिरीयप्रातिशाख्ये वाजसनेयिप्रातिशाख्ये ऋक्तन्त्रे तथा चतुरध्यायिकायां च विविधवैदिकस्वराणां कथं प्रयोगः कृतः वर्तते सःविषयो वर्णितो विद्यते ।

**विषयः**

अत्र प्रबन्धे वाजसनेयिप्रातिशाख्यानुसारं वर्णानाम् उच्चारण-स्थानानि वक्ष्यमाणानि वर्तन्ते। अतः सर्वादौ तावत् वर्णपदेन कीदृशोऽर्थो ग्राह्यो भवतीति निरूप्यतेऽधुना - अक्षरपर्यायत्वेन वर्णो गृह्यते पाणिनीयव्याकरणात् पूर्ववर्तिषु व्याकरणेषु। भाष्यकृता पतन्जलिनापि भणितम्- "वर्णं वाहुः पूर्वसूत्रे" इति। पूर्वसूत्रे इत्यस्यैव 'पूर्ववर्तिषु व्याकरणेषु' इति व्याख्यानमूह्यम्। एतत्सर्वं महावैयाकरणै-र्दीनबन्धुझामहाभागैः प्रोक्तम् –

**वर्णमेवाक्षरं प्राज्ञैः पर्यायेण निगद्यते ।**
**'वर्णं वाऽहुः पूर्वसूत्रे' इति भाष्येऽभिधानतः** ।। इति ।।

क्वचित् छन्दःशास्त्रादौ वर्णगणनाप्रसङ्गेऽच्-रहितस्याक्षरस्य ग्रहणं यतो न दरीदृश्यते । अतो वर्णशब्देन न व्यञ्जनस्य ग्रहणम् अपितु स्वरस्यैव ग्रहणं जायते इति कृत्वा स्वराणामेव वर्णपदवाच्यतेति स्वीकार्या। स च वर्णशब्देन व्यवह्रियमाणः स्वरो व्यञ्जनसहितो व्यञ्जनरहितश्चोभयविधो ग्रामः। अत एव 'राम' 'हरि' इत्यादौ द्व्यक्षरव्यवहारोऽपि संगच्छते। यथोक्तं वृद्धिसूत्रभाष्ये "रामेति द्व्यक्षरन्नाम मानभङ्गः पिनाकिनः” वैयाकरण-चक्रचूडामणिना श्रीमता दीनबन्धुनापि अभाणि –

**"क्वचिदक्षशब्देन स्वर एव तु गृह्यते।**
**सव्यञ्जनोऽव्यञ्जनो वा द्व्यक्षरादिपदे यथा ।।**

यद्यपि लिपिनाक्षराणामभिव्यक्तिर्जायते तथापि तयोस्तादात्म्या-ध्यासेन लिपिरपि अक्षरशब्देन व्यवह्रियते । निगदितञ्च तेनैव विदुषा-

**लिपिर्यद्यप्यक्षरस्य व्यञ्जिका व्यङ्गमक्षरम् ।**
**तथाप्यभेदाध्यासेन लिपिरप्यक्षरं मता ।।**

इत्थं संक्षेपेण वर्णवदवाच्यता कुत्रेति यथामति विवेचितम्।

* वर्णस्थानानि *

एतर्हि एकैकस्प वर्णस्य यत्स्थानं वाजसनेयिप्रातिशाख्ये निरूपितमस्ति तदेव ससूत्रं शास्त्रचिन्तनपरशेमुषीमतां भवतां समक्षे प्रस्तूयते-

१."ऋ ^कौ जिह्वामूले" सूत्रेऽत्रोभेऽपि पदे प्रथमाद्विवचनान्ते । 'ऋ' इति सूत्रोच्चरितेन ऋवर्णेन "ह्रस्वग्रहणे दीर्घप्लुतौ प्रतीयात्" इति परिभाषासूत्रानुरोधेन दीर्घप्लुतावपि ऋवर्णौ गृह्येते । "^क" इति

"^ख" इत्यस्याप्युपलक्षणं, तेन तस्य जिह्वामूलीये पर्यवसाने सूत्रघटकेन कपदेन "प्रथमग्रहणे वर्गम्" इति परिभाषानुसारेण कवर्गस्य ग्रहणं जायते। तत्र च कखगघाङात्मका वर्णा वर्तन्ते। तथा च त्रिविधस्य ऋकारस्य जिह्वामूलीयस्य कवर्गस्य चोच्चारणस्थानं जिह्वामूलं विद्यते इति निर्गलितोऽर्थः।

२."इचशेयास्तालौ" अत्र सूत्रेऽपि पूर्ववदिकारेण दीर्घप्लुतयोः, चकारेण चछजझञात्मकस्य चवर्गस्य ग्रहणमूरीकर्तव्यम् इति विशेषः तथा सूत्रार्थः फलति - त्रिविधस्येकारस्य चवर्गस्य शकारस्य एकारस्य यकारस्य च तालु स्थानं वर्तते।

३."षटौ मूर्धनि" टकारण "प्रथमग्रहणे वर्गम्" इत्यनेन टवर्गस्थ ग्रहणं भवति। तथा च षकारस्य 'टठडढण' इत्याकारकस्य पञ्चवर्णात्मकस्य' टवर्गस्य च मूर्धा स्थानं वर्तते इति अर्थो निष्पद्यते।

४."रो दन्तमूले" सूत्रेऽस्मिन् न किमपि विशिष्टं व्याख्यान-मपेक्षितमस्ति। सूत्रार्थस्तु "दन्तमूलस्थानवान् रेफः" इति।

५."लृलसिता दन्ते" अस्मिन् सूत्रेऽपि लृशब्देन "ह्स्वग्रहणे दीर्घप्लुतौ प्रतीयात्" इति परिभाषासूत्रानुरोधेन दीर्घप्लुतयोर्ग्रहणं भविष्यतीति मत्वा भाष्यकृतोवटेन "लृ लृ लृ३एते त्रयः" इति व्याख्यातम्। तच्च "लृवर्णस्य द्वादश, तस्य दीर्घाभावात्" इति प्रवादविरुद्धं "तुल्यास्यप्रयत्नं सवर्णम्" "अकः सवर्णे दीर्घः" इति सूत्रस्थ-भाष्यविरुद्धञ्च प्रतीयते। यदि प्रवादस्य भाष्यस्य च लौकिक-विषयकत्वमङ्गीक्रियते तदा नोक्तविशेधः। किन्तु तथा स्वीकारेऽपि मूलं मृग्यम्। यदि वा दीर्घघटितान्युदाहरणानि वेदे लक्ष्यन्ते तथा कल्पने क्षतिविरहोऽस्त्येव।

लपदेन तु लकारस्य 'सि' इत्यनेन सकारस्य तकारण पूर्ववत् तवर्गस्य ग्रहणे जाते "लकारस्य त्रिविधस्य द्विविधस्य वा तथा लकारस्य सकारस्य तवर्गस्य च दन्तस्थानं बोध्यम्"।

६."उवो ^प्पा ओष्ठे" उपदेन पूर्ववद्दीर्घप्लुतयोर्ग्रहणं, '^प्' इत्यपि पूर्ववत् '^फ्' इत्यस्मोपलक्षणम्। 'प' इत्यनेन पूर्ववत् पवर्गस्य ग्रहणम्। तथा च सूत्रार्थो जायते त्रिविधस्योकारस्य वकारस्य ओकारस्य उपध्मानीयस्य पवर्गस्य च ओष्ठस्थानम्।

७."अहविसर्जनीयाः कण्ठे" अकारण दीर्घप्लुतयोरपि ग्रहणं पूर्ववज्जायते। विसर्जनीमपदं विसर्गपर्यायं। सूत्रार्थस्तु इत्थं फलति - "त्रिविधस्याकारस्य हकारस्य विसर्गस्य च कण्ठस्थानं भवति"।

८.'यमानुस्वारनासिक्यानां नासिके' कुँ खुँ गुँ घुँ इत्येते चत्वारो यमाः, अनुस्वारनासिक्यौ च नासिकास्थानवन्तो भवन्ति।

नोट- मध्ये 'सवर्णञ्च" ऐकारौकारयोः कण्ठ्या "पूर्वा मात्रा ताल्वोष्ठयोरुत्तरा" इमे द्वे सूत्रे वर्तते, तथापि ते सूत्रे न स्थानबोधके। अतोऽस्ति तयोरव्याख्यानमत्र।

**विशेष :-** यद्यपि प्रथमे सूत्रे "जिह्वामूले" इत्यत्र प्रथमान्तत्वं सम्भवति। तथापि सर्वेषु सूत्रेषु स्थानबोधकशब्दोत्तरसप्तमीश्रवणात् प्रथमेऽपि तथैव कल्पन युक्तम्। किञ्च सप्तमी पक्षे 'स्थाने' इति सप्तम्यन्तमधिकारसूत्रमपि प्रमाणं भवितुमर्हति। सर्वत्र सप्तमी औपश्लेषिकी ग्राह्या। तेन कण्ठमूलसमीपे तालुसमीपे मूर्धसमीपे दन्तमूलसमीपे दन्तसमीपे ओष्ठसमीपे कण्ठसमीपे मासिकासमीपे च वर्णानां स्थानमित्यर्थो निष्पद्यते। प्रमाणसिद्धोऽयमर्थोऽस्यानङ्गीकारे भग्नदन्तादीनामुच्चारणानापत्तिः स्यात्। इत्थं यथामति वर्णाना-मुच्चारणस्थानानि विवेचितानि।

**सन्दर्भग्रन्थसूची**


१. ऋग्वेदः- शर्मा गङ्गासहाय- संस्कृतसाहित्यप्रकाशन, नईदिल्ली-2016

२. वाजसनेयीप्रातिशाख्य- एस्. एन् घोषल, इण्डियान स्टडीज्, नईदिल्ली-2012

३. ऋग्वेदभाष्यभूमिका- स्वीमीदयानन्दसरस्वती, आर्ष साहित्य प्रचार ट्रष्ट, -2010

४. मनुस्मृति-पण्डित गिरिजाप्रसादद्विवेदी, चौखम्बाप्रकाशन, वाराणसी-1998


**पाद टिप्पणी -**

[1]ऋग्वेदभाष्टभूमिका

[2]मनूस्मृति-२/६